तस्य पङ्के एव हि प्ररोह इति तस्य तथात्वम् । “रक्तशालिमहाशालिकलमशकुनाहृतसुगन्धककर्दमकशकुनाहृतसुगन्धककलमनीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादयः” सुश्रु० ।

**कर्द्दमाटक** पु० कर्द्दमे इव आटोगतिरत्र कप् । विष्ठादिनिक्षेपस्थाने शब्दरत्ना० । [प्रचुरकर्दमयुक्तदेशे ।

**कर्द्दमिनी** स्त्री कर्दमानां देशः पुष्करा० देशे इनि ।

**कर्पट** पुंन० कृ–कर्म्मणि विच्–कर्–पटः कर्म्म० । १लक्तके जीर्णवस्त्रखण्डे (लातािकानि), २मलिनवस्त्रे । करस्थः पटः शक० । घर्म्मादिमार्ज्जनार्थं हस्तन्यस्ते । ३वस्त्रखण्डे । ४कषायरक्ते वस्त्रे च । ‘नीलशैलस्य पूर्वस्मिन् स्वरूपं प्रतिपादितम् । नाभिमण्डलपूर्वस्यां भस्मकूटस्य दक्षिणे । पूर्वस्यां कर्पटो नाम पर्वतोयमरूपधृक्”कालिका ८१अ० उक्ते । ५पर्वतभेदे पु० । [कादौ शब्दरत्ना० ।

**कर्पटिक** त्रि० कर्पट–अस्त्यर्थे ठन् । कर्पटवस्त्रयुक्ते भिक्षु-

**कर्पण** पु० कृप–ल्युट् कृगा० लत्वाभावः । आयसे शस्त्रभेदे । “चापवक्रकणपकर्पणप्रासपट्टिशसुषलतोमरादिप्रहरणजालमुपयुञ्जानः” दशकु० ।

**कर्पर** पु० कृप्–अरन् लत्वाभावः । १कपाले घटावयवे २शीर्षास्थनि, अमरः (माथार खुली), ३शस्त्रभेदे (कात) ४कटाहे च मेदिनी ५उदुम्बरे वृक्षे शब्दच० ।

**कर्परांश** पु० ६त० । कपालांशे (खावरा) शब्दचि० ।

**कर्पराल** पु० कर्पर इवालति अल–अच् । पर्वतपीलुभेदे । (आखरोट) कन्दराले रमानाथः ।

**कर्पराशिन्** पु० कर्परेऽश्नाति अश–भोजने णिनि । वटुकभैरवे । “श्मशानवासी मांसाशी कर्पराशी मखान्तकृत्” वटुकस्तवः । [त्यम् । कर्परोरूपे तुत्थे हेम० ।

**कर्परिकातुत्थ** कर्पर्य्येव स्वार्थे कन् कर्परिका सैव तु-

**कर्परी** स्त्री कृप–अरन्–लत्वाभावः गौ० ङीष् । १दारुहरिद्राक्वाथभवे तुत्थे(तुँते) अम० । २रसके भावप्र० खर्परीति वाऽत्र पाठः । रसकश्चोपरसभेदः उपरसभेदाश्च उपरसशब्दे उक्ताः भावप्र० तद्गुणाद्युक्तं यथा “कखर्परीतुत्थकं तु यादृग्न्यत्तद्रसकं स्मृतम् । ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः” । तुत्थसामान्यं तु नोपरस इति भेदः ।

**कर्पास** पुंन० कृ-पास । वस्त्रहेतुतूलयोनौ (कापास) वृक्षभेदे अमरः । गौरा० ङीष् । तत्रैव स्त्री भावप्र० । ‘कर्पासी तुण्डकेरी च समुद्रान्ता च कथ्यते । कर्पासिका लघुः कोष्णा मधुरा वातनाशिनी । तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम् । तत्कर्णे पिडकानाद पूयस्रावविनाशनम् । तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु” इति तत्रोक्तेः ।

**कर्पासफल** न० ६त० । (माकाटो) कर्पासीवीजे ।

**कर्पूर** पुंन० कृप्–खर्जू० ऊर लत्वाभावः । स्वनामख्याते गन्धद्रव्ये, तद्गुणाः भावप्र० उक्ताः, यथा “कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः । सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः । दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः । कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः । पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम् । (अथ चिनिआ कर्पूर) “चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः । कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः । कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णास्त्रदाहदः । चिरस्थो दाहशोषघ्नः स शीतः शुभकृत् परः” । तस्य च “पोतासः भीमसेनः सितकरः शङ्करावालुकसंज्ञः पांशुः पिञ्जः अब्दसारः हिमवालुकः जूतिका तुषारः हिमशीतलः पत्रिकाख्यभेदात् द्वादश भेदा राजनि० । ततः काशा० चतुरर्थ्यामिल । कर्पूरिल तत्सन्निकृष्टदेशादौ त्रि० । शुभ्रादिपाठात् तन्नामके । २नरभेदे तस्यापत्यं शुभ्रा० ढक् । कार्पूरेय तदपत्ये पुंस्त्री । [ कर्चूरे शब्दच० ।

**कर्पूरक** पु० कर्पूर इव कायति कै–क । (कचूर) नामद्रव्ये

**कर्पूरतिलका** स्त्री उमासखीभेदे विजयायाम् शब्दमाला ।

**कर्पूरतैल** न० कर्पूरस्य तैलमिव स्नेहः । कर्पूरस्नेहरूपे हिमतैले तैलभेदे राजनि० । “कटूष्णं हिमतैलं स्यात् कफवातामयापहम् । दन्तदार्ढ्यकरं पित्तकारकं परिकीर्त्तितम्” राजनि० ।

**कर्पूरनालिका** स्त्री “घृताढ्यया समितया लम्बं कृत्वा पुटं ततः । लवङ्गोल्वणकर्पूरयुतया सितयाऽन्वितम् । पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका । संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका” भावप्र० उक्ते पाकभेदसिद्धे भक्ष्यभेदे ।

**कर्पूरमणि** पु० कर्पूरवर्णो मणिः । रत्नभेदे, “कर्पूरमणिनामायं युक्त्या वातादिदोषनुत्”राजनि० । कर्पूराश्मादयोऽप्यत्र पु० ।

**कर्पूररस** पु० कर्पूर इव श्वेतोरसः पारदः । पाकविशेषेण कर्पूरवत्कृते पारदे रसकर्पूरे तत्पाकप्रकारः भावप्र० उक्तो यथा—

“अथ कर्पूररसस्य विधिः तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम् । शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः । इष्टिकां खटिकां तद्वत्स्फटिकां सिन्धुजन्म च । वल्मीकं क्षारलवणं भाण्डरञ्जकमृत्तिकाम् । सर्वाण्येतानि सञ्चूर्ण्य वास-